**अभिद्रवण** न० अभि+द्रु—ल्युट् । १ वेगेन गमने । अप् । अभिद्रवोऽप्युक्तार्थे पु० ।

**अभिद्रुह्** त्रि० अभिद्रुह्यति अभि+द्रुह् क्विप् । १ अपकारके

**अभिद्रोह** पु० अभि+द्रुह्—घञ् । १आक्रोशे, २अनिष्टचिन्तने, ३अपकारे च । "नामजातिग्रहं तेषामभिद्रोहेण कुर्वतः" । मनुः "भूतेन्द्रियानभिद्रोहो धर्मोहि परमोमतः" का०ख०

**अभिधर्षण** न०आभिमुख्येन धर्षणम् । १निष्पीडने २आस्फालने ३भूतादेरावेशे च । कर्त्तरि ल्यु । ४राक्षसे पु० ।

**अभिधा** स्त्री अभि+धाञ्—भावे अङ् । १ कथने, २शब्दनिष्ठे अर्थबोधजनकताशक्तिभेदे च । अभिधीयतेऽनेनेति करणे अङ् । ३ वाचकशब्दे भट्टमते फलजनकव्यापाररूपायां शब्दनिष्ठायां ४ भावनायाञ्च । अभिधा च सङ्केतितार्थस्य बोधिका शब्दनिष्ठा शक्तिरिति आलङ्कारिका "वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ॥ व्यङ्ग्योव्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः" ता अभिधाद्याः । "तत्र सङ्केतितार्थस्य बोधनादग्रिमाऽभिधा" सा०द० । भाट्टास्तु प्रवृत्तिजनने विधिव्यापारीभूता विधि समवेता भावनापरनामाऽतिरिक्तपदार्थविशेषोऽभिधा तस्या एव ज्ञानं प्रवर्त्तकं तत्रैव च भावनात्वरूपेण विधिशक्तिः सा च जन्यत्वसम्बन्धेन एकपदोपात्तत्वप्रत्यासत्त्या वा आख्यातसामान्यशक्तिबललभ्या कृतिरूपव्यापारविधेरर्थान्तरे विशेषणतयाऽन्वेति प्रकृत्यर्थोऽपि विषयितया व्यापारे विशेषणं तथा च यागविषयकभावनाजन्यव्यापारवान् पुरुष इत्यन्वयबोधः नचैतादृशबुद्धावपि प्रयोजनाज्ञाने कुतः प्रवृत्तिः प्रयोजनस्याहेतुत्वे विश्वजिदादौ फलकल्पनानुपपत्तेरिति वाच्यम् यागविषयकव्यापारेऽभिधाजन्यत्वस्यान्वये व्यापारनिष्ठेष्टसाधनत्वस्यान्वयप्रयोजकरूपतया योग्यतात्वेन योग्यताबलादेव व्यापारे तद्भानात् । यद्वा विधित एव स्वर्गादिसाधनत्वग्रहस्तच्च प्रवृत्तिरूपव्यापारे आख्यातार्थेऽन्वेति प्रवृत्ताविष्टसाधनताज्ञानमेव प्रवर्त्तकम् । न चैवं न्यायमताविशेषः इष्टसाधनत्वेन विध्यर्थत्वस्वीकारादिति वाच्यं क्रियागतं साधनत्वं न विध्यर्थः अपि तु प्रवृत्तिगतमिति विशेषात् अभिधाभ्युपगमानभ्युपगमाभ्यामपि विशेषसम्भवाच्च न चैवं तादृशाभिधायां मानाभाव इति वाच्यं विधिः प्रवृत्तिजनकधर्म्मसमवायिकारणं तज्जनकद्रव्यत्वादात्मवदित्यनुमानादेव तत्सिद्धेः भट्टमते शब्दस्य द्रव्यत्वान्नासिद्धिः । न च प्रवृत्तिजनकशरीरे व्यभिचारः, तस्य शरीर प्राणसंयोगोपादानत्वात् न च विधिर्न प्रवृत्तौ कारणं प्रवृत्तिसामान्ये व्यभिचारात् इति वाच्यं वैधजन्यप्रवृत्तौ तद्धेतुत्वात् ज्ञानवत् प्रवृत्तावपि वैलक्षण्यसम्भवाच्च तच्च जातिरूपमखण्डोपाधिरूपं स्वरूपं वेत्यन्यदेतत् । नन्वस्त्वभिधा तथापि तज्ज्ञानं प्रवृत्तिहेतुः प्रवृत्तिसामान्ये तस्य व्यभिचारात् प्रत्यक्षादिना इष्टसाधनत्वग्रहेऽपि प्रवृत्तेः, नापि,यागादिविषयिकायां, यागकृतिः स्वर्गसाधनमित्याप्तवाक्यादितोपि प्रवृत्तेः । नापि विधिजन्यायां, तज्जन्यतावच्छेदकस्यैव दुष्परिचयात् । नापि जातिविशेषविशिष्टायां, गुणगतजात्यनभ्युपगमात् इति चेन्न विधिजन्यतावच्छेदकाखण्डोपाध्यवच्छेदेनैव तद्धेतुत्वात् न च भावनादिपदादपि तादृशप्रवृत्त्यापत्तिरिति वाच्यं विधिजन्यभावनाज्ञानस्यैव विलक्षणशक्तिमत्त्वेन तादृशप्रवृत्तिविशेषे हेतुत्वादित्याहुः । तामेतामभिधारूपभावनां प्रभाकरान मन्यन्ते । एवं हि तस्यानिरासस्तैः कृतः" अभिधासंकल्प्याऽपूर्व्वभावनाज्ञानं न प्रवर्त्तकं तस्मिन् सत्यप्यप्रवृत्तेः असत्यपि प्रवृत्तेश्च किन्तु कार्य्यत्वज्ञानमेव प्रवर्त्तकमिति तथा हि ज्ञानस्य कृतौ जनयितव्यायां चिकीर्षातिरिक्तं न कर्त्तव्यमस्ति यत्सत्त्वे कृतिविलम्बो हेत्वन्तराभावात् । चिकीर्षा च कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयकेच्छा पाकं कृत्वा साधयामीति तदनुभवात् सा च स्वकृतिसाध्यज्ञानसाध्या इच्छायाः स्वप्रकारकधीसाध्यत्वनियमात्"इति । यथा चास्यैव प्रवर्त्तकत्वं तथा विधिशब्दे वक्ष्यते । सा चाभिधाशक्तिः कुत्रार्थे कस्येति व्याकरणादितोज्ञायते तदुक्तमभियुक्तैः "शक्तिग्रहं व्याकरणोपमानात् कोषाप्तवाक्यात् व्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा" इति व्याख्यायेदमुदाहृतमस्माभिः शब्दार्थरत्ने । यथा "तत्र सर्वेषां शब्दानां प्रथमतो व्यवहारादेव प्रायशः शक्तिग्रहः । तथा हि केनचित् वृद्धेन व्युत्पन्नं पुरुषं प्रति गामानयेत्युपदिष्टे तत् श्रृण्वन् व्युत्पन्नो गवानयने प्रवर्त्तते । तच्चेष्टादर्शनेन तत्प्रवृत्तिमनुमाय व्युत्पित्सुर्बालो व्युत्पन्नपुरुषीयप्रवृत्त्यन्यथानुपपत्त्या तद्धेतुभूतकर्त्तव्यतादिज्ञानादिकं तत्रानुमिनुतेऽनुमिनुते चापरकारणानुपस्थितेः श्रुतस्यैव समुदितवाक्यस्य तद्धीजनकत्वम् । ततश्च वाक्यस्य तद्धीजनकत्वेन तत्सम्बन्धित्वमवसीयते इत्यतो व्यवहारस्यैव शक्तिग्राहकत्वमित्येवमवसीयते शास्त्रकारैः । पश्चाच्च पदानामन्वयव्यतिरेकाभ्यां प्रत्येकपदशक्तिग्रहः तथा हि पुनश्च गां बधान घटमानयेत्यादिवाक्यश्रवणे नियोज्यस्य पूर्व्वापेक्षया विशेषकार्य्यप्रवृत्तिदर्शनेन गवादिपदश्रवणसत्त्वे तत्कार्य्यकरणं तदभावे च तत्कार्य्या-